अनुनासिकान्तम् अङ्गम्

सर्वदा सन्धिकार्यात् पूर्वं चिन्तनीयम् अङ्गकार्यप्रसङ्गे | अतः प्रथमतया अङ्गं कीदृशम् ? अङ्गं ग्रह्यादि, वच्यादि, अनुदित्, अनुनासिकान्तम् च | चतुर्षु अङ्गं अन्यतमं चेत्, विशिष्टम् अङ्गकार्यम् अपेक्षितम् |

अनुनासिकान्तम् अङ्गं चेत्, कित्ङित्–प्रत्यये परे चत्वारि सूत्रणि—

१) **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) = वन्–धातोः, अनुनासिकान्त–अनुदात्तोपदेश–धातोः, अनुनासिकान्त–तनादि–धातोः अनुनासिकस्य लोपो भवति झलादि–कित्ङित्–प्रत्यये परे | पञ्चदश धातवः |

२) **जनसनखनां सञ्झलोः** (६.४.४२) = जन्, सन्, खन् एषां धातूनां नकारस्य स्थाने आकारादेशो भवति झलादि–सन्–प्रत्यये परे झलादि–कित्ङित्–प्रत्यये परे च | त्रयः धातवः |

३) **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) = अनुनासिकान्ताङ्गस्य उपधायाः दीर्घादेशो भवति क्वि च झलादि कित्ङित्–प्रत्यये परे | अवशिष्ट–धातवः |

४) **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) = अजादि–कित्ङित्–प्रत्यये परे गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधायाः लोपो भवति | पञ्च धातवः |

मकारान्तानां पदत्वे सति, म्–स्थाने नकारः—

**मो नो धातोः** (८.२.६४) = मकारान्तस्य धातोः पदस्य नकारादेशो भवति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **मः धातोः** इत्यनेन मकारान्तस्य धातोः इत्यस्यापि ग्रहणम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन नकारादेशः पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य मकारस्य | मः षष्ठ्यन्तं, नः प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **मः धातोः पदस्य अन्ते नः** |

मकारान्तानां अपदत्वे सति, म्–स्थाने नकारः—

**म्वोश्च** (८.२.६५) = मकारान्तधातोः धात्वन्त–मकारस्य स्थाने नकारादेशो भवति मकारे वकारे च परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **मः धातोः** इत्यनेन मकारान्तस्य धातोः इत्यस्यापि ग्रहणम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन नकारादेशः पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य मकारस्य | म् च व् च म्वौ, तयोः म्वोः | म्वोः सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मो नो धातोः** (८.२.६४) इत्यस्य पूर्णतया अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **मः धातोः नः म्वोश्च** |

**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) = वन्–धातोः, अनुनासिकान्त–अनुदात्तोपदेश–धातोः, अनुनासिकान्त–तनादि–धातोः अनुनासिकस्य लोपो भवति झलादि–कित्ङित्–प्रत्यये परे | अनुदात्तः उपदेशे येषां ते, अनुदात्तोपदेशाः

बहुव्रीहिः | तनोतिः आदिः येषां ते, तनोत्यादयः बहुव्रीहिः | अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च तेषामितरेतरद्वन्द्वः अनुदात्तोपदेशवनतितनोत्यादयः, तेषाम् अनुदात्तोपदेशवनतितनोत्यादीनाम् | क् च ङ् तयोरितरेतरद्वन्द्वः क्ङौ, तौ इतौ यस्य तत् क्ङित्, तस्मिन् क्ङिति | अनुदात्तोपदेशवनतितनोत्यादीनां षष्ठ्यन्तम्, अनुनासिक इति लुप्तषष्ठीकं पदं, लोपः प्रथमान्तं, झलि सप्तम्यन्तं, क्ङिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते अनुनासिकवर्णः अस्ति (वनतिं विहाय 'अनुनासिक' इति पदं सर्वेषां विशेषणम्); **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्ते स्थितस्य अनुनासिकवर्णस्य लोपः; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **झलि क्ङिति** इत्युक्तौ झलादौ क्ङिति (तादृशप्रत्ययः यस्य आदौ झल् स्यात्) | अनुवृत्ति-सहितसूत्रम्— **अनुनासिक-अनुदात्तोपदेशवनतितनोत्यादीनाम् अङ्गस्य लोपः झलि क्ङिति** |

अनेन आहत्य पञ्चदश धातवः निर्दिष्टाः | वन् धातुः (भ्वादिगणे), अनुनासिकान्त-अनुदात्तोपदेश-धातवः (यम्, रम्, नम्, गम्, हन्, मन्), अनुनासिकान्त-तनादि-धातवः (तनु, क्षिणु, क्षणु, ऋणु, तृणु, घृणु, वनु, मनु) | एषु धातुषु मन्-धातुः दिवादिगणे अस्ति; हन्-धातुः अदादिगणे अस्ति; अष्ट धातवः तनादिगणे सन्ति; अवशिष्टाः भ्वादौ एव | एषां धातूनां अन्ते स्थितस्य अनुनासिकस्य लोपो भवति झलादि-कित्ङित्-प्रत्यये परे |

**जनसनखनां सञ्झलोः** (६.४.४२) = जन्, सन्, खन् एषां धातूनां नकारस्य स्थाने आकारादेशो भवति झलादि-सन्-प्रत्यये परे झलादि-कित्ङित्-प्रत्यये परे च | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन आकारादेशः पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य नकारस्य | जनश्च सनश्च खन् च तेषामितरेतरद्वन्द्वः जनसनखनः, तेषां जनसनखनाम् | सन् च झल् च तयोरितरेतरद्वन्द्वः सञ्झलौ, तयोः सञ्झलोः | जनसनखनां षष्ठ्यन्तं, सञ्झलोः सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **विड्वनोरनुनासिकस्यात्** (६.४.४१) इत्यस्मात् **आत्** इत्यस्य अनुवृत्तिः, **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) इत्यस्मात् **झलि**, **क्ङिति** इत्यनयोः अनुवृत्तिः | **झलि** इति अनुवृत्तिः **सन्** इत्यस्य विशेषणम्; अनेन यत्र सनि इडागमो भवति, तत्र सन् झलादिः नास्ति अतः नकारस्य आत्वं न भवति | सूत्रे स्थितं 'झलि' तु **क्ङिति** इत्यस्य विशेषणम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **जनसनखनाम् अङ्गानाम् आत् झलि सञ्झलोः क्ङिति** |

**अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) = अनुनासिकान्ताङ्गस्य उपधायाः दीर्घादेशो भवति क्वि च झलादि कित्ङित्-प्रत्यये परे | क्विश्च झल् तयोरितरेतरद्वन्द्वः क्विझलौ, तयोः क्विझलोः | क् च ङ् तयोरितरेतरद्वन्द्वः क्ङौ, तौ इतौ यस्य तत् क्ङित्, तस्मिन् क्ङिति | अनुनासिकस्य षष्ठ्यन्तं, क्विझलोः सप्तम्यन्तं, क्ङिति च सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **नोपधायाः** (६.४.७) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **ढ्रलोपे पूर्वस्य दीर्घोऽणः** (६.३.१११) इत्यस्मात् **दीर्घः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते अनुनासिकवर्णः अस्ति; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **क्विझलोः क्ङिति** इत्युक्तौ क्वि + झलादौ क्ङिति (तादृशप्रत्ययः यस्य आदौ झल् स्यात्) | अनुवृत्ति-सहितसूत्रम्— **अनुनासिकस्य अङ्गस्य उपधायाः दीर्घः क्विझलोः क्ङिति** |

**गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) = अजादि-कित्ङित्-प्रत्यये परे गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधायाः लोपो भवति (परन्तु अङ्-प्रत्ययः चेत् लोपः न भवति) | गमश्च हनश्च जनश्च खनश्च घस् च तेषामितरेतरद्वन्द्वो गमहनजनखनघसः, तेषां गमहनजनखनघसाम् | क् च ङ् च क्ङौ, क्ङौ इतौ यस्य सः क्ङित्, तस्मिन् क्ङिति | न अङ् अनङ्, तस्मिन् अनङि | गमहनजनखनघसां षष्ठ्यन्तं, लोपः प्रथमान्तं, क्ङिति सप्तम्यन्तम्, अनङि सप्तम्यन्तम् अनेकपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य

अधिकारः | अनुवृत्ति-सहितसूत्रम्— **गमहनजनखनघसाम् अङ्गानाम् उपधायाः लोपः अनङि अचि क्ङिति** |

**नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) = अजादि-पित्-सार्वधातुकप्रत्यये परे अभ्यस्तस्य लघूपधगुणः न भवति | न अव्ययपदम्, अभ्यस्तस्य षष्ठ्यन्तम्, अचि सप्तम्यन्तं, पिति सप्तम्यन्तं, सार्वधातुके सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **पुगन्तलघूपधस्य च** (७.३.८६) इत्यस्मात् **लघूपधस्य** इत्यस्य अनुवृत्तिः, **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अचि पिति सार्वधातुके, अभ्यस्तस्य अङ्गस्य लघूपधस्य गुणः न** |

**हो हन्तेर्ञ्णिन्नेषु** (७.३.५४) = हन्-धातोः हकारस्य स्थाने कवर्गादिशो भवति ञिति णिति प्रत्यये परे, नकारे परे च | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गे घकारः आदिष्टो भवति | ञ् च ण् च ञ्णौ इतरेतरद्वन्द्वः, तौ इतौ ययोस्तौ ञ्णितौ, बहुव्रीहिः | ञ्णितौ च नश्च तेषामितरेतरद्वन्द्वो ञ्णिन्नाः, तेषु ञ्णिन्नेषु | **इक्श्तिपौ धातुनिर्देशे इति वक्तव्यम्** इति वार्तिकेन (३.३.१०८, वार्तिकम्), धातुनिर्देशे हन् धातोः हन्ति, षष्ठीविभक्तौ हन्तेः | हः षष्ठ्यन्तं, हन्तेः षष्ठ्यन्तं, ञ्णिन्नेषु सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **चजोः कु घिण्ण्यतोः** (७.३.५२) इत्यस्मात् **कुः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **हन्तेः अङ्गस्य हः कु ञ्णिन्नेषु** |

<u>लट्-लकारः</u>

| | | |
|---|---|---|
| **ति/ईति** | तः | अति |
| **सि/ईषि** | थः | थ |
| **मि/ईमि** | वः | मः |

<u>लोट्-लकारः</u>

| | | |
|---|---|---|
| **तु/ईतु**/तात् | ताम् | अतु |
| हि/तात् | तम् | त |
| **आनि** | **आव** | **आम** |

<u>लङ्-लकारः</u>

| | | |
|---|---|---|
| **त्/ईत्** | ताम् | उः |
| **स्(ः)/ईः** | तम् | त |
| **अम्** | व | म |

<u>विधिलिङ्-लकारः</u>

| | | |
|---|---|---|
| यात् | याताम् | युः |
| याः | यातम् | यात |
| याम् | याव | याम |

<u>धातवः</u>

गम् → जङ्गम् [यङ्लुकि]
क्षिणु हिंसायाम् → क्षिण् → चेक्षिण् [यङ्लुकि]
खनु अवदारणे → खन् → चङ्खन् [यङ्लुकि]
जन् → जञ्जन् [यङ्लुकि]
हन् हिंसागत्योः → जङ्घन् [यङ्लुकि]
तन् → तन्तन् [यङ्लुकि]

Swarup – October 2015